CCE-II-RR/PR/PF/NSR/NSPR(A)/888/4009

**A**

**ಜೂನ್ 2024 ರ ಪರೀಕ್ಷೆ - 2**

**JUNE 2024 EXAMINATION - 2**

ಒಟ್ಟು ಮುದ್ರಿತ ಪುಟಗಳ ಸಂಖ್ಯೆ : 12 ]
Total No. of Printed Pages : 12 ]
ಒಟ್ಟು ಪ್ರಶ್ನೆಗಳ ಸಂಖ್ಯೆ : 45 ]
Total No. of Questions : 45 ]

**CCE RR/PR/PF/ NSR/NSPR FULL SYLLABUS**

**ಸಂಕೇತ ಸಂಖ್ಯೆ : 16-S**
**Code No. : 16-S**

Question Paper Serial No.

# ವಿಷಯ : ಪ್ರಥಮ ಭಾಷೆ — ಸಂಸ್ಕೃತ

# Subject : First Language — SANSKRIT

# प्रथमभाषा — संस्कृतम्

**(ಶಾಲಾ ಪುನರಾವರ್ತಿತ ಅಭ್ಯರ್ಥಿ / ಖಾಸಗಿ ಪುನರಾವರ್ತಿತ ಅಭ್ಯರ್ಥಿ / ಖಾಸಗಿ ಅಭ್ಯರ್ಥಿ / ಎನ್.ಎಸ್.ಆರ್. / ಎನ್.ಎಸ್.ಪಿ.ಆರ್.)**

**(Regular Repeater / Private Repeater / Private Fresh / NSR / NSPR)**

ದಿನಾಂಕ : 14. 06. 2024 ] [ Date : 14. 06. 2024

ಸಮಯ : ಬೆಳಗ್ಗೆ 10-15 ರಿಂದ ಮಧ್ಯಾಹ್ನ 1-30 ರವರೆಗೆ ] [ Time : 10-15 A.M. to 1-30 P.M.

ಗರಿಷ್ಠ ಅಂಕಗಳು : 100 ] [ Max. Marks : 100

**Cut here/ಇಲ್ಲಿ ಕತ್ತರಿಸಿ**

***ಪರೀಕ್ಷಾರ್ಥಿಗಾಗಿ ಸಾಮಾನ್ಯ ಸೂಚನೆಗಳು :***

1. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯು ಒಟ್ಟು 45 ಪ್ರಶ್ನೆಗಳನ್ನು ಹೊಂದಿದೆ.
2. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಹಿಮ್ಮುಖ ಜಾಕೆಟ್ ಮೂಲಕ ಮೊಹರು (ಸೀಲ್) ಮಾಡಲಾಗಿದೆ. ಪರೀಕ್ಷೆ ಪ್ರಾರಂಭವಾಗುವ ಸಮಯಕ್ಕೆ ***ನಿಮ್ಮ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಬಲಬದಿ ಪಾರ್ಶ್ವವನ್ನು ಕತ್ತರಿಸಿ (ಬಾಣವನ್ನು ಅನುಸರಿಸಿ), ಎಡಬದಿ ಪಾರ್ಶ್ವವನ್ನು ಕತ್ತರಿಸಬೇಡಿ.*** ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯಲ್ಲಿ ಎಲ್ಲಾ ಪುಟಗಳು ಇವೆಯೇ ಎಂದು ಪರೀಕ್ಷಿಸಿಕೊಳ್ಳಿ.
3. ಪ್ರಶ್ನೆಗಳಿಗೆ ಕೊಟ್ಟಿರುವ ಸೂಚನೆಗಳನ್ನು ಪಾಲಿಸಿ.
4. ಬಲ ಭಾಗದಲ್ಲಿ ಕೊಟ್ಟಿರುವ ಅಂಕಿಗಳು ಪ್ರಶ್ನೆಗಳಿಗಿರುವ ಪೂರ್ಣ ಅಂಕಗಳನ್ನು ತೋರಿಸುತ್ತವೆ.
5. ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಓದಿಕೊಳ್ಳಲು 15 ನಿಮಿಷಗಳ ಕಾಲಾವಕಾಶವು ಸೇರಿದಂತೆ, ಉತ್ತರಿಸಲು ನಿಗದಿಪಡಿಸಲಾದ ಸಮಯವನ್ನು ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಮೇಲ್ಭಾಗದಲ್ಲಿ ನೀಡಲಾಗಿದೆ.
6. ನಿಮಗೆ ವಿತರಿಸಲಾಗಿರುವ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಆವೃತ್ತಿ ( Version ) ಮತ್ತು ನಿಮ್ಮ ಪ್ರವೇಶ ಪತ್ರದಲ್ಲಿ ಮುದ್ರಿತವಾಗಿರುವ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಆವೃತ್ತಿ ಒಂದೇ ಆಗಿರುವುದನ್ನು ಖಾತರಿಪಡಿಸಿಕೊಳ್ಳಿ.

***परीक्षार्थिनां सामान्यसूचनाः***

1. अस्मिन् प्रश्नपत्रे पञ्चचत्वारिंशत् (45) प्रश्नाः सन्ति ।
2. इदं प्रश्नपत्रं विपरीतेन आवरणेन मुद्रिताङ्कमस्ति । **परीक्षासमये प्रश्नपत्रमुद्घाटयितुं दक्षिणपार्श्वेन** कर्तयत **(तीर निशानं अनुसराणि) । प्रश्नपत्रमुद्घाटयितुं वामपार्श्वेन मा कर्तयत ।** प्रश्नपत्रस्य पृष्ठानि पूर्णानि सन्ति वा इति अवलोकयत ।
3. प्रश्नानां विषये निर्दिष्टाः नियमाः अनुपालनीयाः ।
4. प्रश्नानां अधिकृताः अङ्काः दक्षिणपार्श्वे लिखिताः सन्ति ।
5. प्रश्नपत्रमुत्तरयितुं निर्धारितः समयावधिः प्रश्नपत्रस्य उपरि भागे लिखितः अस्ति । तत्र पञ्चदशनिमेषाः प्रश्नपत्रस्य पठनार्थं निर्धारिताः सन्ति ।
6. भवद्भ्यः प्रदत्ता प्रश्नपत्रस्य आवृत्तिः ( Version ) तथा भवतां प्रवेशपत्रे मुद्रित–प्रश्नपत्रस्य आवृत्तिः च समाना वा इति पर्यवलोकयत ।

इतः कर्तयत

**14. 06. 2024**

**TEAR HERE TO OPEN THE QUESTION PAPER**

प्रश्नपत्रमुद्घाटयितुम् इतः कर्तयत

**Tear here**

**I. अधोलिखितेभ्यः प्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः । तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह लिखत ।** **6 × 1 = 6**

1. 'देहः' अस्य समानार्थकपदम् इदं भवति ।

   (A) मोहः (B) कायः

   (C) शिरः (D) स्नेहः

2. 'सफलम्' अस्य विरुद्धार्थकपदम् इदं भवति ।

   (A) सुफलम् (B) फलम्

   (C) विफलम् (D) भूरिफलम्

3. 'राजा' अस्य स्त्रीलिङ्गरूपम् इदं भवति ।

   (A) राणी (B) राजी

   (C) रोजा (D) राज्ञी

4. 'आज्ञापयति' अत्र एषः लकारः वर्तते ।

   (A) लोट्लकारः (B) लट्लकारः

   (C) लङ्लकारः (D) लिट्लकारः

5. 'भाषायाम्' अत्र एषा विभक्तिः वर्तते ।

(A) तृतीयाविभक्तिः (B) सप्तमीविभक्तिः

(C) पञ्चमीविभक्तिः (D) द्वितीयाविभक्तिः

6. सतां सङ्गः कुमतिं दूरीकरोति । अत्र रेखाङ्कितदपस्य प्रश्नवाचकपदम् इदं भवति ।

(A) कदा (B) कुतः

(C) कां (D) कीदृशम्

II. चतुर्थं पदं लिखत । 4 × 1 = 4

7. मोघलचक्रवर्ती – औरङ्गजेबः :: केळदीराज्यस्य-महाराज्ञी – .................... ।

8. अर्जुनः – धीरोदात्तः :: दुर्योधनः – .................... ।

9. भूपालः – उत्तानपादः :: सर्वलोकशरण्यः – .................... ।

10. गणपतिः – मुनिः :: रमणः – .................... ।

**III. एकवाक्येन उत्तरं लिखत ।** **7 × 1 = 7**

11. वृत्रासुरः स्वभावतः कथम् अवर्तत ?

12. आकाशकायेषु आकर्षणीयः शक्तिस्वरूपः कः ?

13. लोके सदा किं शाम्यतु ?

14. राजा कान् आचख्यौ ?

15. मोक्षप्राप्तिः केन भवति ?

16. भारतीयभावना निरन्तरं किं ददाति ?

17. रमणमहर्षेः कस्मिन् विषये अनास्था आसीत् ?

**IV. द्वित्रैः वाक्यैः उत्तरं लिखत ।** **4 × 2 = 8**

18. दधीचेः तपोवनं कथम् आसीत् ?

19. भोजस्य जन्मपत्रिकां दृष्ट्वा दैवज्ञः किमाह ?

20. नरस्य वृत्तं के जानन्ति ?

21. कैः षड्भिर्निदानैः रोगाः सम्भवन्ति ?

**V. सूचनानुसारम् उत्तरं लिखत।** **4 × 2 = 8**

22. सन्धिं विभज्य नाम लिखत ।

    a) भूरियम् ।

    b) एतदुपरि ।

23. विग्रहवाक्यं विलिख्य समासनाम लिखत ।

    a) यथाक्रमम् ।

    b) नीलकण्ठः ।

**अथवा**

समासं कृत्वा समासनाम लिखत ।

a) विघ्नानाम् अभावः =

b) चक्रं पाणौ यस्य सः =

24. वाक्ये विद्यमानं कृदन्तपदं चित्वा प्रत्ययस्य नाम लिखत ।

    a) सेवकः ग्रामं गतवान् ।

    b) पुष्पेण विकसितव्यम् ।

25. प्रयोगपरिवर्तनं कुरुत ।

a) बालकः पाठं पठति ।

b) पित्रा कार्यालयः गम्यते ।

**VI. संस्कृतभाषया अनुवादं कुरुत ।** **1 × 2 = 2**

26. ಭಾರತದಲ್ಲಿ ಪ್ರತಿವರ್ಷ ದೀಪಾವಳಿ ಹಬ್ಬವನ್ನು ಆಚರಿಸುತ್ತಾರೆ. ಆಗ ಜನರು ದೇವಾಲಯಕ್ಕೆ ಹೋಗಿ ಹೂವು ಮತ್ತು ಹಣ್ಣುಗಳನ್ನು ಅರ್ಪಿಸುತ್ತಾರೆ.

Diwali is celebrated every year in India. Then people go to the temple and offer flowers and fruits.

**VII. कर्नाटकभाषया, आङ्ग्लभाषया वा अनुवादं कुरुत ।** **1 × 2 = 2**

27. अद्यत्वे नगरेषु जलप्रदूषणम् अधिकम् अस्ति । अस्य कारणेन जनाः रोगपीडिताः भवन्ति ।

**VIII. यथानिर्देशम् उत्तरं त्रिचतुरैः वाक्यैः लिखत ।** **4 × 3 = 12**

28. 'भवानेव संस्कृतेन ग्रन्थान् लिखतु'

कः पाठः ? कः अवदत् ? कम् अवदत् ?

29. मया भोजो रक्षितः ।

कः पाठः ? कः वदति ? कं वदति ?

**अथवा**

किं भवेत् मम समीपे ।

कः पाठः ? कः अवदत् ? कम् अवदत् ?

30. ममाप्यस्ति कौतूहलमेनं वृत्तान्तं श्रोतुम् ।

कः पाठः ? कः अवदत् ? कस्य वृत्तान्तः ?

31. रसे गन्धे न रज्यते ।

कः पाठः ? कः अवदत् ? कः न रज्यते ?

**IX. कवेः देश–काल–कृतीनां विषये त्रिचतुरैः वाक्यैः उत्तरं लिखत ।** **2 × 3 = 6**

32. विद्वान् एच्. वि. नागराजराव् ।

33. वाल्मीकिः ।

**X. पद्यपाठस्य नाम उल्लिख्य तात्पर्यं पञ्चषैः वाक्यैः कर्नाटकभाषया, संस्कृतभाषया, आङ्ग्लभाषया वा लिखत।** **3 × 3 = 9**

34. ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।

तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद्धनम् ।।

35. चित्तशान्तिदायिनी विरक्तिबुद्धिवर्धिनी

भेदभावनाशिनी जनेषु चैक्यकारिणी ।

दुःखशोकहारिणी भवाम्बुधेश्च तारिणी

भारतीयभावना विवृद्धिमेतु भारते ।।

36. इन्द्रः करीन्द्रमारूह्य राहुं कृत्वा पुरःसरम् ।

प्रायाद्यत्राभवत् सूर्यः सहानेन हनूमता ।।

**अथवा**

आङ्गिको वाचिकश्चैव आहार्यः सात्त्विकस्तथा ।

चत्वारोऽभिनयाह्येते विज्ञेया नाट्यसंश्रयाः ।।

**XI. वाक्ये विद्यमानम् अलङ्कारं सलक्षणं समन्वयत ।** **1 × 3 = 3**

37. श्रीरामः समुद्रः इव गम्भीरः ।

**अथवा**

इन्दुः इन्दुरिव श्रीमान् ।

**XII. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत ।** **1 × 3 = 3**

38. उदयति यदि भानुः पश्चिमे दिग्विभागे ।

**XIII. पद्यं पूरयत ।** **1 × 4 = 4**

39. पिबन्ति ..........................................................................

.................................................................................... ।

.....................................................................................

...................................................................... विभूतिः ।।

**XIV. दशवाक्यैः उत्तरं कर्नाटकभाषया, संस्कृतभाषया, आङ्ग्लभाषया वा लिखत ।**

**3 × 4 = 12**

40. वृक्षायुर्वेदग्रन्थे प्रतिपादितानां चतुर्विध वृक्षाणां विषये लिखत ।

41. पाठ्यभागे निरूपितान् नाट्यांशान् सङ्गृह्य लिखत ।

**अथवा**

हनूमतः जननं बाल्यवृत्तान्तश्च पद्यानुगुणं लिखत ।

42. ''भारतं संरक्षितुं सन्नद्धः योद्धा हिमवान्'' कथम् ? इति विवृणुत ।

**XV. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत ।** **1 × 4 = 4**

43. ''राजा प्रत्यक्षदेवता'' इति श्रुतिवाक्यमस्ति । राजानं प्रजाः पितरमिव भावयन्ति । तस्मात् राज्ञापि एवमेव स्वकर्तव्यं निर्वहणीयम् । राजधर्मः स्वप्राणान् त्यक्त्वापि पालनीयः । प्रजासन्तोषमेव नृपाणां शाश्वतः धर्मः । राजा शूरः, सत्यवचनशीलः दयापरः च भवेत् । प्रजाः राजानम् अनुसरन्ति । यस्य राज्ञः राज्ये जनकस्य गृहे सुताः इव प्रजाः भयरहिताः विहरन्ति सः राजा राजश्रेष्ठः भवति ।

**प्रश्नाः**

i) कः प्रत्यक्षदेवता भवति ?

ii) नृपाणां शाश्वतः धर्मः कः ?

iii) प्रजाः कम् अनुसरन्ति ?

iv) कीदृशः राजा राजश्रेष्ठः भवति ?

**XVI. पत्रं लिखत ।** **1 × 5 = 5**

44. उत्तरकन्नडमण्डलस्य सर्वकारीयप्रौढशालायाः छात्रः/छात्र इति मत्वा अग्रजस्य विवाहनिमित्तं दिनद्वयस्य विरामं सम्प्रार्थ्य कक्ष्याध्यापकं प्रति विरामपत्रं लिखत ।

**अथवा**

भवतः/भवत्याः अध्ययनविषयमधिकृत्य पितरं प्रति पत्रं लिखत ।

**XVII. दशवाक्यैः प्रबन्धं लिखत ।** **1 × 5 = 5**

45. परिसरमालिन्यम् ।

**अथवा**

गणराज्योत्सवः ।

DO NOT WRITE ANYTHING HERE